# shAntistavaH

# શાન્તિસ્તવઃ

## Document Information

Text title : shaantistava

File name : shaantistava.itx

Category : devii, otherforms, stotra, tyAgarAja, devI

Location : doc_devii

Author : Tyagaraja

Transliterated by : Sridhar Seshagiri sridhar.seshagiri at gmail.com

Proofread by : Sridhar Seshagiri sridhar.seshagiri at gmail.com

Description-comments : Hymn in praise of the Devi as a peace personification

Latest update : January 13, 2002

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 28, 2022

*sanskritdocuments.org*

# શાન્તિસ્તવઃ

॥ ત્યાગરાજવિરચિતઃ॥

સ્વાનન્દમન્દહસિતાં શિવવામભાગાં
    ભૃઙ્ગાવલીકચભરાકલિતેન્દુમૌલિમ્ ।
શ્યામાં વિશાલનયનામતિકોમલાઙ્ગીં
    વન્દે સ્મરારિમહિલાં વરદાં શિવાખ્યામ્ ॥ ૧॥

કાલદેશકલનાવિવર્જિતા સ્વેચ્છયૈવ ભુવનાન્યજીજનત્ ।
ક્રીડતિ સ્વયમનેકભૂમિકા સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૨॥

સ્વપ્રકાશશિવશક્તિરૂપિણી સર્વભૂતહૃદયાબ્જહંસિકા ।
નિષ્પ્રકારસુખચન્દ્રચન્દ્રિકા સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૩॥

સર્વભૂતહૃદયપ્રચોદિકા શર્વવિષ્ણુનિખિલાત્મરૂપિણી ।
નિર્વિકારરસરૂપલક્ષિતા સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૪॥

યા પરાદિવચસામગોચરા રૂપનામરહિતા પરા વરા ।
યા ત્રયીપ્રમુખમાર્ગદર્શિની સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૫॥

નિર્મમા નિખિલલોકરક્ષણી કર્મકાણ્ડફલદાનકામધુક્ ।
આપ્તકામધિષણાત્મરૂપિણી સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૬॥

પઞ્ચકોશઘનમુક્તચન્દ્રિકા પઞ્ચભૂતજડવિશ્વદીપિકા ।
પઞ્ચમૂર્તિરવબિન્દુનાયિકા સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૭॥

ચિદ્વિલાસજગદેકરૂપિણી હ્યસ્તિભાતિસુખરૂપસત્તયા ।
ષડ્વિકારરહિતા નિરાશ્રયા સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૮॥

યાગયોગજપહોમકર્મભિર્નૈવ જાતુ પરમા હિ લભ્યતે ।
પ્રજ્ઞયા સહજયૈવ યાપ્યતે સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૯॥

જાગ્રદાદિસમયેષુ વૃત્તિષુ ભ્રાજતે તનુષુ સર્વસાક્ષિણી ।

સ્વર્ણવત્ સકલભૂષણેષુ યા સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૧૦॥

નેતિ નેતિ નિગમોક્તિબોધિતા જ્ઞાનિનાં તુ હૃદયે સદોજ્જ્વલા ।
ભેદભાવગલનાત્ સદાત્મિકા સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૧૧॥

ભેદતો ભવતિ ભીરિતિ શ્રુતેર્યાન્તિ તેન રહિતા યદેકતામ્ ।
આપગાસ્તુ સરિતામિવેશ્વરે સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૧૨॥

નામરૂપકુલધર્મવર્જિતા જન્મનાશરહિતા સદવ્યયા ।
કલ્પનાન્તસમયેઽપિ યા સ્થિરા સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૧૩॥

કોટિકોટિજનિપુણ્યસંસ્કૃતઃ સર્વકામરહિતો જિતેન્દ્રિયઃ
યાં વિભાવ્ય પરિમુચ્યતે ભવાત્ સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૧૪॥

શાસ્ત્રપાઠમનનૈર્ન લભ્યતે ધૈર્યવીર્યનયતઃ પરાક્રમૈઃ ।
કેવલં ગુરુદૃશા પ્રકાશતે સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૧૫॥

પ્રાણબુદ્ધિહૃદયાત્મસાક્ષિણી સર્વયજ્ઞપરિતૃપ્તિકામિની ।
જ્ઞાનપુષ્પરસપૂજિતાભયા સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૧૬॥

યત્ર નાસ્તિ નિખિલં ચરાચરં હ્યેકરૂપરસવસ્ત્વભેદતઃ ।
નેહ નેતિ વિધિવાક્યચોદિતા સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૧૭॥

યા ગુરૂક્તિસુધયા મનોમલે ક્ષાલિતે સપદિ સત્યચિન્મણિઃ ।
દ્યોતતે સકલધીપ્રભાસુરા સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૧૮॥

દહ્યતે ન શિખિના સદાવ્યયા સત્તયા દહતિ પાવકસ્તૃણમ્ ।
શુષ્યતે ન મરુતાખિલેશ્વરી સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૧૯॥

સિદ્ધ્યસાધ્યપરમન્ત્રવર્જિતા હ્યષ્ટસિદ્ધિપરસિદ્ધિભૂમિકા ।
શુદ્ધચિત્તપરમામૃતાત્મિકા સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૨૦॥

દેહમાનદલિતસ્ય યોગિનઃ સર્વતોઽપિ પરિપૂર્ણકામતા ।
ભાતિ યા પરમગુપ્તરૂપિણી સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૨૧॥

ઇન્દ્રજાલમિદમલ્પકાલિકં વિશ્વમેવમિતિ નિશ્ચયાત્મનઃ ।
બોધરૂપત ઇહૈવ ભાતિ યા સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૨૨॥

વિશ્વયોનિરમૃતાભયાક્ષરા નિત્યતૃપ્તિરજરા પરાત્પરા ।
ઇત્થમાગમવચોભિરીડ્યતે સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૨૩॥

સર્વદા સમરસાત્મરૂપિણી સર્વલોકજનની હ્યરૂપિણી ।
શર્વનૃત્યસુખસાક્ષિણી ચ યા સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૨૪॥

ઇન્દ્રિયાર્થસુખબોધબોધિની ચન્દ્રભાનુશિખિદીપ્તિકારિણી ।
બન્ધવર્ગભયમોહમોચિની સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૨૫॥

દેહજીવજગદીશબાધને શિષ્યતે સ્વયમનન્તરૂપિણી ।
વ્યાપિની જગતિ સન્તતં ચ યા સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૨૬॥

પ્રાણબન્ધપરિશુદ્ધચેતસાં નિર્વિકલ્પસુખરૂપિણી સદા ।
ચિન્મયી સદસદાત્મિકા ચ યા સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૨૭॥

યત્સુખાબ્ધિલવલેશનિવૃતા બ્રહ્મવિષ્ણુસુરમાનવાદયઃ ।
સમ્ભવન્તિ યુગકલ્પભેદતઃ સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૨૮॥

બ્રહ્મલોકતૃણમાનિને સદા તૃપ્તિરૂપપરશાન્તિદાયિની ।
યોગિને સમરસં દદાતિ યા સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૨૯॥

સર્વમેકરસમિત્યુદેતિ યા નિર્મલા નિરવધિશ્ચ ચેતસિ ।
દેશિકેન્દ્રપદભક્તિયોગિનઃ સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૩૦॥

માયિકસ્ય જગતઃ સ્થિતિર્યયા સ્વપ્નકાલનગરીવ યોગિનઃ ।
ભાસતે નિજસુખૈકભોગિનઃ સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૩૧॥

નિસ્તરઙ્ગસુખસિન્ધુરૂપિણીં યામનુસ્મરતિ બન્ધમુક્તયે ।
શાન્તિદાન્તિધૃતિયુક્તયોગિરાટ્ સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૩૨॥

ભૂતભાવિમતિવૃત્ત્યભાવિકાં વર્તમાનસુખવૃત્તિભાસિકામ્ ।
યેઽનુસન્દધતિ નિત્યમાદરાત્ સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૩૩॥

બુદ્ધિમોહપટલે વ્યપોહિતે શાણચક્રનિગમોક્તિતઃ સ્વયમ્ ।
પ્રસ્ફુરત્યવિરતં ચ ચિન્મણિઃ સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૩૪॥

નાહમિત્યનૃતજાડ્યભૂમયઃ સચ્ચિદેવ સકલાત્મભાસકઃ ।
ઇત્થમેકરસરૂપશેમુષી સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૩૫॥

વૃત્તિસન્ધિવિલસત્સ્વરૂપિણી પ્રજ્ઞયા હૃદિ વિભાવ્યતે સદા ।
નિત્યમુક્તિસુખકાઙ્ક્ષિણા દૃઢં સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૩૬॥

ત્યાગરાજસુખરૂપિણી પરં યોગિરાજહૃદયોજ્જ્વલા સદા ।
આગમાદ્યખિલમાનબોધિતા સા શિવાહમિતિ શાન્તિમાશ્રયે ॥ ૩૭॥

શાન્તિસ્તવં પઠતિ નિત્યમનન્યભક્ત્યા
    યો માનવો ભવતિ શઙ્કર એવ સાક્ષાત્ ।
સંસારદુઃખભયમોચનદક્ષકલ્પં
    સ્વાત્માપરોક્ષકરણે ગુરુપાદકલ્પમ્ ॥ ૩૮॥

ઇત્યાનન્દનાથપાદપદ્મોપજીવિના કાશ્યપગોત્રોત્પન્નેનાન્ધ્રેણ
ત્યાગરાજનામ્ના વિરચિતઃ શાન્તિસ્તવઃ સમ્પૂર્ણઃ ।

Encoded by Sridhar Seshagiri seshagir at engineering.sdsu.edu

*shAntistavaH*
pdf was typeset on July 28, 2022

Please send corrections to *sanskrit@cheerful.com*